# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ८२

एतदाख्याय काकुत्स्थो भ्रातृभ्यामभितप्रभः ।
लक्ष्मणं पुनारेवाह धर्मयुक्तमिदं वचः ॥ १॥

वसिष्ठं वामदेवं च जाबालिमथ कश्यपम् ।
द्विजांश्च सर्वप्रवरानश्वमेधपुरस्कृतान् ॥ २॥

एतान्सर्वान्समाहूय मन्त्रयित्वा च लक्ष्मण ।
हयं लक्ष्मणसम्पन्नं विमोक्ष्यामि समाधिना ॥ ३॥

तद्वाक्यं राघवेणोक्तं श्रुत्वा त्वरितविक्रमः ।
द्विजान्सर्वान्समाहूय दर्शयामास राघवम् ॥ ४॥

ते दृष्ट्वा देवसङ्काशं कृतपादाभिवन्दनम् ।
राघवं सुदुराधर्षमाशीर्भिः समपूजयन् ॥ ५॥

प्राञ्जलिस्तु ततो भूत्वा राघवो द्विजसात्तमान् ।
उवाच धर्मसंयुक्तमश्वमेधाश्रितं वचः ॥ ६॥

स तेषां द्विजमुख्यानां वाक्यमद्भुतदर्शनम् ।
अश्वमेधाश्रितं श्रुत्वा भृशं प्रीतोऽभवत्तदा ॥ ७॥

विज्ञाय तु मतं तेषां रामो लक्ष्मणमब्रवीत् ।
प्रेषयस्व महाबाहो सुग्रीवाय महात्मने ॥ ८॥

शीघ्रं महद्भिर्हरिभिर्बहुभिश्च तदाश्रयैः ।
सार्धमागच्छ भद्रं ते अनुभोक्तुं मखोत्तमम् ॥ ९॥

विभीषणश्च रक्षोभिः कामगैर्बहुभिर्वृतः ।
अश्वमेधं महाबाहुः प्राप्नोतु लघुविक्रमः ॥ १०॥

राजानश्च नरव्याघ्र ये मे प्रियचिकीर्षवः ।
सानुगाः क्षिप्रमायान्तु यज्ञभूमिमनुत्तमाम् ॥ ११॥

देशान्तरगता ये च द्विजा धर्मपरायणाः ।
निमन्त्रयस्व तान्सर्वानश्वमेधाय लक्ष्मण ॥ १२॥

ऋषयश्चा महाबाहो आहूयन्तां तपोधनाः ।
देशान्तरगता ये च सदाराश्च महर्षयः ॥ १३॥

यज्ञवाटश्च सुमहान्गोमत्या नैमिषे वने ।
आज्ञाप्यतां महाबाहो तद्धि पुण्यमनुत्तमम् ॥ १४॥

शतं वाहसहस्राणां तण्डुलानां वपुष्मताम् ।
अयुतं तिलमुद्गस्य प्रयात्वग्रे महाबल ॥ १५॥

सुवर्णकोट्यो बहुला हिरण्यस्य शतोत्तराः ।
अग्रतो भरतः कृत्वा गच्छत्वग्रे महामतिः ॥ १६॥

अन्तरापणवीथ्यश्च सर्वांश्च नटनर्तकान् ।
नैगमान्बालवृद्धांश्च द्विजांश्च सुसमाहितान् ॥ १७॥

कर्मान्तिकांश्च कुशलाञ्शिल्पिनश्च सुपण्डितान् ।
मातरश्चैव मे सर्वाः कुमारान्तःपुराणि च ॥ १८॥

काञ्चनीं मम पत्नीं च दीक्षार्हां यज्ञकर्मणि ।
अग्रतो भरतः कृत्वा गच्छत्वग्रे महामतिः ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com